।।ॐ श्रीपरमात्मने नमः।।

# शिवसंकल्पसूक्तम्

## शुक्लयजुर्वेदः (अध्यायः ३४, मन्त्रः १-६)

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।

यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु।।२।।

**अन्वयसहितवङ्गानुवादः** – अपसः (কর্মরত) धीराः (বুদ্ধিমান) मनीषिणः (মনীষিগণেরা) यज्ञे (যজ্ঞে) येन (যা দ্বারা) कर्माणि (সকল কর্ম) कृण्वन्ति (করেন) (**যা**) प्रजानाम् (প্রজাদের) अन्तः (অন্তে বিরাজ করে) विदथेषु (যজ্ঞে) यत् (যা) अपूर्वं यक्षम् (অদ্ভূত ও পূজনীয় বল প্রদান করে) तन्मे (আমার সেই) मनः (মন) शिवसङ्कल्पमस्तु (শুভ সঙ্কল্পকারী হোক)।

**व्याख्या** - अस्मिन् मन्त्रे ऋषिभिः उच्यते तावत् मनसैव यज्ञादिकार्याणि सम्पादितानि। शुद्धचित्तमेव सत्कार्यपालनस्य उपयुक्तम्। प्रत्येकमनुष्याणम् अन्ते हृदये चित्तस्यावस्थानम्। अस्माद् कारणादेव ऋषिभिः देवानाम् आवाहनं स्वहृदयेषु क्रियते। तेन ते दिव्यबलयुक्ताः निष्पापाः निष्कलुषाः तिष्ठन्ति। अनेन चित्तेनैव गृहस्थाः कर्म्मठाः भवन्ति पुनश्च अनेन चित्तेनैव सन्यासिनः विषयविमुखाः भवन्ति। मनसः शुद्धशान्तस्थितिमाध्यमेनैव अस्माकं नवोन्मेषः भविष्यति। अतः तत् मनः सदा शुभसङ्कल्पे प्रयुक्तं भवेत् इति अस्माकं प्रार्थना।

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।

यस्मान्न ऋते किं चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु।।३।।

**अन्वयसहितवङ्गानुवादः** – यत् (যা) प्रज्ञानम् (প্রজ্ঞানস্বরূপ) उत (এবং বা আবার) चेतः (চেতনাস্বরূপ) च धृतिः (এবং ধৈর্যস্বরূপ) यत् (যা) अमृतम् (অমৃতস্বরূপ) प्रजासु अन्तः (প্রজাগণের হৃদয়ে যা) ज्योतिः (জ্যোতিস্বরূপ) यस्मात् ऋते (যাকে ছাড়া) किञ्चन कर्म (কোনো কাজও) न क्रियते (করা সম্ভব নয়) तन्मे मनः (আমার সেই মন) शिवसङ्कल्पम् (শুভসঙ্কল্পযুক্ত) अस्तु (হোক)।

**व्याख्या** – अस्माकं चित्तं प्रज्ञानस्वरूपं यतो हि अनेन प्रकर्षेण विषयं ज्ञायते। अपि च अस्माकं चित्तम् चैत्यन्यस्वरूपं यतो हि इदं चेतयति नाम सम्यक् ज्ञापयति विषयम्। अपि तु अस्माकं चित्तं धैयस्वरूपं यतो अस्माद् हि धैर्योत्पत्तिः भवेत्। सर्वेन्द्रियाणां प्रकाशकत्वात् इदं ज्योतिस्वरूपं। यत् मनुष्याणां हृदये वर्तते। इदं चित्तमन्तरेण कदापि किमपि कार्यं न भवति अतः ऋषेः आशयः तत् चित्तं सदा शुभसङ्कल्पे एव तिष्ठतु इति।